M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 349

Title: Purashcharan Vidhi

349

पुरश्चरण ~~विधि~~ विधि

Purashcharana Vidhi	Title	
	Author	
	Editor	
	Year, Vols.	
	Publisher	
349	Remarks	

श्रीगणेशाय नमः॥ निष्कृतिर्न हि देवानां मंत्राणां कलिदोषतः॥ मंत्रदोषनिवृत्त्यर्थं गायत्रीमाश्रयेद् द्विजः॥१॥
गायत्रीमंत्रसिध्यर्थं गायत्र्ययुतं जपेत्· सर्वेषां वेदमंत्राणां सिध्यर्थं लक्षकं जपेत्·२ गायत्रीं सर्वपाप
घ्नीं शिरोव्याहृतिसंपुटं॥ अयुतं तु जपेन्नूनं गायत्री सिद्धिदा ततः॥३॥ त्रिमधुर्वै त्रिसाहस्रं गायत्र्या जुहुयाद
थ॥ भूसुराणां सुराणां च भेदो नास्ति जगत्त्रये·४ अथ मंलक्षगायत्रीं शिरोव्याहृतिसंपुटं· ततः सर्वैर्वेदमं
त्रैः सर्वसिद्धिं च विंदति॥५॥ होमः कार्यश्च गायत्र्या जुहुयादयुतं मधु· वेदमंत्रास्ततः सर्वैभ्यक् द्विजानां का
मधेनवः॥६॥ तर्पणं वाभिषेकं च होमं विप्रांश्च तर्पयेत्· चिंतामणिर्देवनदी कामधेनुः सुरद्रुमः॥७॥ एवं
तीत्याह मंत्रार्थी ऋग्विधानेन शौनकः॥ वक्ष्ये दृष्टक्रमात्तस्य वर्गमंत्रांश्च शाश्वतः॥८॥ शृणुध्वं भूसुराः स
र्वे विश्वामित्रेन समाहिताः॥ सूक्तानां यत्फलं प्रोक्तं वर्गाणां तच्छतोत्तरं·७॥ वर्गाणां यत्फलं प्रोक्तं वर्गाणां
तच्छतोत्तरं· मंत्राणां यत्फलं प्रोक्तं पादानां तच्छतोत्तरं॥१०॥ ९ तदा हि जयेद्धीमान्यागादिषु यथाक्रमं·७

वि· ष्वर्यवाइदंसूक्तंत्रिसाहस्रंजपेज्जले·११६तान्याद्यजन्मनिकाब्रह्महत्याप्रमुच्यते·मित्रोजनेनसूक्तंवैत्र्य
१ युतंवशिवालये॥१२॥शिवंस्पृष्ट्वाजपेद्धीमान्सुरापीमुच्यतेततः·प्रत्यर्पणंततःकार्यंहिरण्यस्तेयथाम
हत्·१३॥प्रसुसूक्तंजपेल्लक्षंबिल्वेवाश्वच्छकेववा॥नमोमित्रस्यसूक्तंस्यादयुतंगुरुतल्पगः॥१४॥
ज्ञानतोज्ञानतोवापिमुच्यतेविष्णुमंदिरे·उभाउनूनंसूक्तंतुतत्संयोगीचपातकं॥१५॥चतुर्लक्षंजपेद्धीमान्
मुच्यतेसर्वपातकैः·परंमृत्योतुसूक्तंवैसंकीर्णद्युपयातकात्॥१६॥जपेतुलक्षसंख्याकंनदीसंगेविमुच्य
ते·अकारादिहकारांतंजलमध्येजपेद्वा॥१७॥ज्ञानज्ञानकृतंसर्वंमहापातककंदहेत्·विश्वेदेवाःशास्त
नेतिजपेत्सूक्तंजलेपिवा॥१८॥विमुच्यतेत्रिवारंतुसुवर्णादिप्रतिग्रहात्·सप्तजन्मकृतंपापंकृत्वाचाभक्ष्यभ
क्षणे॥१९॥तद्विष्णोरित्ययंमध्येसकृज्जप्त्वाविशुध्यति·१९॥अवतेहेळइतिद्वाभ्यांमुच्यतेसर्वकिल्बिषैः
कृतैश्चक्रियमाणैश्चकरिष्यद्भिर्नसंशयः॥२०॥अक्रान्जिशर्द्धःसूक्तंतुसर्वशाखापठंतिवेधतिहासपुराण १

निषड्गंसतहृदकं·॥२१॥अग्निमीळेजपेत्सूक्तंपापघ्नंश्रीकरंचयत्·पारायणफलंतस्यवेदानांचैवसर्वशः॥२२॥अस्य
स्यवामस्यसूक्तंतुजपेचान्यत्रवाजले·ब्रह्महत्यादिकंवध्वाविष्णोर्लोकंसगच्छति॥२३॥संपूषन्नध्वनःसूक्तंया
त्राकालेजपेद्बुधः·अभयेनागमिष्यंतिकार्यसिद्धिर्भवेत्ततः॥२४॥नवाउदेवाःसूक्तंतुअत्रकामोजपेद्बुधः॥
अत्राहीलभतेसाधुयावदस्तंसमाप्नुयात्॥२५॥व्युषाआवोदिविजेतिप्रातःसूक्तंजपेत्सुधीः·हिरण्यरत्न
वस्त्राणिषण्मासाल्लभतेनरः॥२६॥याओषधीर्जपेत्सूक्तंबीजारोपणसंग्रहे·यदिस्पृष्ट्वाभूमिकृषौधान्यं
तस्याक्षयंभवेत्·२७कनिक्रदज्जपेत्सूक्तंयात्राकालेप्रशस्तकं·सुषेनरतिसूक्तंतुप्रवेशोवैप्रशस्तकं॥२८॥
संहर्षन्विदुपात्सूक्तंनद्दष्योजपेद्बुधः·पुनरायातिवैतस्यदूतंचोरादितैर्यदि॥२९॥इयमददाज्जपेत्सूक्तं
तस्यसास्वतंभवेत्·सहस्रस्यनिर्वर्ष्यचमेधाकाकामोजपेद्बुधः॥३०॥अतोदेवेतिवर्गंवैजपंकुर्याद्दिनंदिनं॥
ब्रह्माद्यैर्वंदितःपश्चाद्विष्णुसायुज्यमाप्नुयात्·३१॥प्रसायुयुजेसूक्तंतुनश्यत्यन्तकिल्बिषात्·नद्यांवापुतसं

वि. रव्याकं सर्पिषाग्नौ सहस्रकं ॥३३॥ सहस्रशीर्षासूक्तं तु त्रिवारं च दिने दिने । बिल्वादिसर्वदेवानां समर्चनफलं ल
भेत् ॥३३॥ पुरोजितीवः सूक्तं तु गोघ्नानां पापनाशनं । ग्रहणे चंद्रसौरे वा मोक्षपर्यंतवाशुचिर्भवेत् ॥३४॥ अ
२ श्रसूक्तेन साहस्रं होमं चेल्लभने तु सः । धर्मार्थकाममोक्षादिसर्वं मधु समर्पयः ॥३५॥ त्वंचिदादीनि सूक्ता
नि दश ग्रंथाय्यथाक्रमं ॥ तज्ज्ञ येन तदाप्नोति यत्फलं संहितादिकैः ॥३६॥ मनोवाक्कायदोषाणां प्रायश्चित्तं
विशोधनं । पितुस्तोजपेत्सूक्तं मंत्ररोपैर्न लिप्यते ॥३७॥ अन्नं स्पृष्ट्वा भुक्तिकाले वर्द्धते त्र तु तत्कुले । त्रिजपे
त्प्र सुवः सुक्तं स्नानलोपो भवेद्यदा ॥३८॥ ज्येष्ठशुक्लदशम्यां तु व्यतीपाते जले सुधीः । विष्णोर्नुकं जपेत्सूक्तं
विष्णुभक्तिर्भविष्यति ॥३९॥ स्नानोदयं ततः पश्चाद्विष्णुसायुज्यमाप्नुयात् । मनःशुद्धिप्रदं सूक्तं जपेत्सोमा
म विद्धि वै ॥४०॥ अंगारकचतुर्थ्यां तु दशवारं जले पिबा । ज्ञातिसंकरदोषस्तु त्येतत्सूक्तेन नश्यति ॥४१॥ पु २
रुपुच्छेय दा पुक्ते हस्तार्के वा जले स्थितः । एकवारं त्रिवारं वा जपेत्सूक्तं कया शुभः ॥४२॥ स्वपूर्वजन्मसूत्रा

णि कृतापीडा त्रणश्यति । तत्सूक्तेनैव जुहुयादयुतं मधुरात्रिलैः ॥४३॥ वदंति पितरः प्रीतास्ते हंसाद्वंतसं
शयः । कृणुष्वेति जपेत्सूक्तं श्राद्धकाले प्रशस्तकं ४४ रक्षोघ्नं पितृतस्यार्थं पूर्णो भवति सर्वतः । प्रयुंजतीज
पेत्सूक्तं वाक्शक्तिर्द्धि सूक्तस्य दा भवेत् ४५ ॥ सप्तम्यां रविपुक्तायां जलमध्ये यदा दश । करवीरस्य गायत्र्या
होमं कुर्यात्सहस्रकं ॥४६॥ व्याधिनाशो भवेच्छीघ्रं मृत्युश्चैव विनश्यति । अमायामिंदुयुक्तायां कुंभमासेष
दारविः ॥४७॥ अग्निमस्तोषि सूक्तं तु कायाशुद्धिर्दिने दिने । अश्वहत्यादिदोषैस्तु धन्वी सूक्तेन नश्यति ४८
आश्वयुक्या नवम्यां तु शक्तियुक्ते नदे वते । विहिसोत्तो जपेत्सूक्तं गुरुधिक्कारदोषतः ॥४९॥ माघे वा फा
ल्गुने वापि रेवत्यां भार्गवे शतं । दद्यात्तु रूपसूक्तेन यः पुष्पां रप्य एव वा ॥५०॥ अर्चितं चम्रगत्सर्वैते ने दं
सचराचरं । इयमददादित्येव सूक्तं सारस्वतं द्विजः ५१ जपेत्प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान् ।
सोमस्य मा जपेत्सूक्तं रात जन्मकृतानि वै ५२ मनोगतानि पापानि क्षयं यांति सहस्रशः । यदद्येति जपेत्
सूक्तं कामदोषात्प्रमुच्यते ॥५३॥ सप्तम्यां रविवारे तु माघमासे जलेशतं । यइंद्राग्नी जपेत्सूक्तं काय

वि. दोषात्प्रमुच्यते॥५४॥ जन्मांतरसहस्रेषु मकरस्थे दिवाकरे। सप्तकोटि महामंत्रे यत्फलं लभते द्विजः॥५५॥
देवस्य सवितुर्वर्गं जपसूक्तत्फलमाप्नुयात्। प्रहोतेति जपेन्मंत्रं स्तवस्तोत्रफलं लभेत्॥५६॥ सुवर्णि जपेन्मं
२ त्रं सर्वहोमफलं लभेत्॥ ककारादिहकारांतं व्यस्तं तु जपेद्दशं॥५७॥ शिवंस्मरन्वातत्रस्मरणमोक्षोत्र
संशयः॥ ततः केश्येति मंत्रेण जुहुयात्त्रिसहस्रकं॥५८॥ प्रियंगुनि मधुयुक्तानि ऋणनाशं च मूर्तिदं। प्रात
रग्निं जपेत्सूक्तं तल्लेले लक्षं शिवालये॥५९॥ कन्यार्थी लभते कन्यां लाजाकुल्ययुतं हुनेत्। घृतं क्षीरं च
जुहुयात्तत्सूक्तेनायुतं मधु॥६०॥ जपेल्लक्षं स्त्रियं यां वै कांक्षते तां नरो लभेत्। वायवायाहि सूक्तेन खेचर
त्वं लभेन्नरः॥६१॥ दिवितावश्यमाप्नोति चैकवारं दिने दिने। अश्विना यज्वरीः सूक्तं जपेच्चापि
विनाशनं॥६२॥ ह्यानैश्वर्यप्रदं तत्र सर्वसिद्धिमवाप्नुयात्। सुरूपकृत्नुं सूक्तानि जपेद्वा विष्णुसन्निधौ॥६३
सर्वसिद्धिमवाप्नोति पंचवारं दिने दिने। अग्निं दूतां सूक्तानि जपेच्चैव शिवसन्निधौ॥६४॥ त्रिवारं चे
त्रिवर्षांतं कार्यसिद्धिं च विंदति। अयं देवाय सूक्तानि त्रयोदश जपेच्छिवे॥६५॥ अरिष्टनाशं स्तंभनादि २

षण्मासाल्लभते नरः॥ वसिष्ठास सप्तसूक्तानि लक्षं विष्णौ जपेद्यदि॥६६॥ स्तंभनादिकृतो दोषो राजार्थवा
प्रणश्यति। एतायादीनि सूक्तानि जपेल्लक्षं शिवालये॥६७॥ गणेशत्वमवाप्नोमवाप्नोति युच्यते सर्वाक
ल्बिषैः॥ प्रवः पांतं जपेत्सूक्तं माघमासे शिवालये॥६८॥ तस्यारिष्टभयं नास्ति रक्षो व्याधिखगादिभिः॥
कुसुमायास सूक्तानि जपेच्चैव विष्णुमंदिरे॥६९॥ मार्गशीर्षे ऽयुतं पीत्वा तरका [illegible]
[illegible] निर्गतः॥७०॥ कार्तिक्यां त्वयुतं धीमान्कीर्तिमान्विष्णुमंदिरे। अग्निमीळे
पुरोहितं सूक्तं प्रातः स्योत्कर्षणे जपेत्॥७२ सर्वेषां प्राणिनामेव शतवारं दिने दिने। प्रणवव्याहृतीनां तु त्र्य
युतं संपुटं जपेत्। त्र्यंबकं महामंत्रं मृत्युरेव निवर्तते। इंद्रत्वा च त्रिसूक्तानि जपेत्सुश्रूषस दा द्विजा॥७३॥
अयुतं तत्र संपूर्णं शैवे वा वैष्णवेपि वा। उग्रो नशे त्रिसूक्तानि जपे युते तु ऋत्विजाः॥७४॥ अयुतं तत्र सं
पूर्णं शैवे वा वैष्णवेपि वा॥ भवो ध्वस्ति सूक्तं तु पापघ्नं राजवश्यकं॥७५॥ तत्पश्चाद्धीकरं लक्षं जपेन्मा
द्वे शिवालये। जपेत्त्रिर्देवमंत्रं तु शिरोरोगो विनश्यति॥७७॥ आयुः पुत्रादिकं पश्चाद्युतं विष्णुमंदिरे॥

दे॰ वि॰ तनसूक्तविष्णुमंत्रेण होमं कुर्यात्सहस्रकं ॥७७॥ अर्केण त्रिमधुयुक्तं शिरोरोगो विनश्यति । मंदस्येति जपेत्सूक्तं
परपापविनाशनं ॥७८॥ भूतिदं चित्तिशुद्धिं च लक्षं चेद्विष्णुसंनिधौ । त्वावतो वै सूक्तं जपः क्रोधे च दुरित
४ क्षयं ॥७९॥ करोति शांतिदः पश्चादयुतं वै लैं जपित्वा । वयमुत्वा जपेत्सूक्तं लोभनाशः सदा भवेत् ॥
॥८०॥ उदारत्वं ततः सर्वं लक्षं चेद्विष्णुमंदिरे ॥ ईळे द्यावेति सूक्तं वै जपेन्मोहस्य नाशनं ॥८१॥ ज्ञाने
श्वर्यप्रदं पश्चादयुतं बिल्वमूलके । अग्ने मृळ जपेत्सूक्तं मदनाशस्तदा भवेत् ॥८२॥ अयुतं सर्वसि
द्धिं च फाल्गुने विष्णुमंदिरे । रक्षोहणं जपेत्सूक्तं मत्सरो नास्ति सत्यतः ॥८३॥ लक्षे चेद्भूमिदं तत्र
जले वाश्वत्थमूलके । प्रमादात्तत्र भूपस्तु विनियुक्तो मृतः पशुः ॥८४॥ शुद्धो नि होता से मां द्यावन्यायो
त्रिर्जयेत्स शतावयमुत्वा पयः सूक्तं दशवारं दिने दिने ॥८५॥ जपेच्चेदर्थवस्त्रादि राजगृह्यं प
शोलक्षेत् । इदं विष्णुर्विपर्यं च जत्वांगुष्ठे विस्पृशन् ॥८६॥ स्पृष्टास्पृष्टान्नदोषार्या पितृणामक्ष ४
यं भवेत् । इदं विष्णुरादिभिर्मंत्रैः पंचभिः श्राद्धकर्मणि ॥८७॥ अंगुष्ठग्रहणं कुर्यात्तेन रक्षो न बाधते ॥ इं

द्रायसामसूक्तं वै श्राद्धविघ्नोपदा भवेत् ॥८८॥ अग्न्यादिभिर्भोजनानां श्राद्धसंपूर्णमेव हि । भोजनोपक्रमात्
पूर्वं त्वाक्रांतात्परतो यदि ॥८९॥ श्राद्धविघ्ने पुनः कार्यं जपहोमौ तु तत्क्षितः । येदेवासश्च जह्वा षण्मासं च
दिने दिने ॥९०॥ अष्टाविंशतिमष्टौ वा मोक्षो न संशयः ॥ ब्रह्मणाग्निर्जपेत्सूक्तं त्रिवारं च दिने दिने ॥९१॥
नष्टार्थऋणिनो लाभः षण्मासे वापि वत्सरे ॥ हविष्पांते जपेत्सूक्तं महापातकनाशनं ॥९२॥ दिने दिने त्रि
वारं तु विद्या श्रीसत्कुले स्थिरा ॥ सहस्रवेदसहशं ज्ञातवेदसऋक्सकृत् ॥९३॥ नासाध्यं तं न लोकेषु शत
वारं दिने दिने । सुरापस्तल्पगस्तेनः संयोगी ब्रह्मघातकः ॥९४॥ इति वा इति सूक्तं तु त्रिर्जपेत्पुरश्चेत्पा
तकं ॥ न तमंहो जपेत्सूक्तं अयुतं विष्णुमंदिरे ॥९५॥ शतं धाना तु पापाच्च मुच्यते नात्र संशयः ॥ तरत्समंदी
सूक्तेन मार्जने वै सहस्रकं ॥९६॥ पतिव्रतासंगदोषात्र बुध्या ह्यात्र लिप्यते । तन्तुवो चामसूक्तं तु जपेद्धि त्वयुतं द्वि
जः ॥९७॥ स्वामिद्रोही महापापी तेन पापेन मुच्यते । क्षेत्रस्य पतिना सूक्तं त्रिर्जपेदन्वहं द्विजः ॥९८॥ सुक्षे
त्रभोगभोग्यं च त्रिवर्षात्सर्वथा लभेत् । मुंचामि त्वा जपेत्सूक्तं मुख्ययुक्तं दिने दिने ॥९९॥ त्रिवारं तु शिव

वि. स्नानेशतापुष्पंलभेन्नरः॥ऊर्ध्वैलोवाप्रधक्त्नविष्णुरिमामिंद्राग्नीअमृतं जुषेथां॥१००॥ मंत्रं दयातांउदी
र्कमापुरस्मेपत्तं पुरुभुजापुरंधिं॥२॥ ईश्वरयंतिजपेल्लक्षंविल्वेशिवालये· कुष्ठनाशोभवेच्छीघ्रंमाघमा
५ सेनसंशयः॥३॥ हंसो मंत्रंजपेद्धीमानव्ययुतंविष्णुमंदिरे· अर्धं हत्वागुष्ठरोगीसुवर्णसमितामियात्॥३॥
अग्निंतरोनपेल्लक्षंभगिनीसंगसंभवात्· बिल्वेमाघेलक्षसंख्यामनसोमुच्यतेतदा॥४॥ सकृत्कुमिबजप
मंत्रंशतवारंदिनेदिने· लक्ष्मीश्चवर्द्धतेसत्यमलक्ष्मीर्नद्दितकुले॥५॥ महित्रीणांजपेल्लक्षंधात्र्यां
तुफाल्गुने॥ सर्वनश्यतुम्हटेपापंसाधुषुकल्पित॥६॥ बृहस्पतिर्नलक्षंजपेच्चेद्युतंपुनः॥ पितरोदु
नतास्यमुच्यतेसर्वपातकैः॥७॥ अमीवहातुलक्षंवैजपेन्नित्यंशिवालये॥ व्ययुतंचेत्कुष्ठरोगीस्वर्णव
र्णप्रयातिसः॥८॥ तीव्रस्याभिजपेल्लक्षंमस्मातेविनश्यति॥ महापातकसंयुक्तोनिरोगीभूतलेस्थि
तः॥९॥ इदंसोकुक्षिशूलीचजपेल्लक्षंशिवालये॥ अयुतंमाघमासेतुमुच्यतेनात्रसंशयः॥१०॥ स ५
र्योनोदिवासैःस्रक्षंप्रत्यहंप्रजपेद्दश॥ वदर्याग्नेत्रिवर्षांतंद्दयाक्षिव्याधिनाशनं॥११॥ यद्द्यकच्च

मंत्रंवैशतवारंजपेत्सदा॥ जनवश्यंराजवश्यंदेववश्यंचभूतिदं॥१२॥ माचिदन्यज्जपेल्लक्षंपुत्रीसंगेनदू
षितः॥ अश्वत्थेफाल्गुनेलक्षंमुच्यतेसर्वकिल्बिषैः॥१३॥ निमंत्रितोजपेद्दोग्ध्रीनियुक्तस्तुनिर्षगिणः· मु
क्त्वांतेवामदेव्यंवैश्राद्धभोजीनलिप्यते॥१४॥ स्वादोरफक्षिसक्षंतुश्राद्धकालेजपेद्बुधः॥ वैगुण्यंकर्तृभो
क्तृणांयदिदोषोनसिद्धति॥१५॥ स्वादिष्ठयाद्यगरुपर्यंतंजपेच्चेद्विष्णुमंदिरे· चैत्रेरोद्रप्रशस्तस्तुमहदेश्व
र्यमेतिसः॥१६॥ प्रदेवाद्यप्रपर्यंतंमश्वत्थेवैसहस्रज्जपेत्· उच्चातेशयनेशस्तंपंचपातकनाशनं॥१७॥ अ
स्मेप्रयंधिमंत्रंचशतवारंदिनेदिने· बिल्वेवाप्रजपेद्धाश्यांवद्धइव्यंचविंदति॥१८॥ अष्टोत्तरशतंमंत्रंगणा
नांत्वाजपेद्बुधः॥ दिनेदिनेसर्वसिद्धिंसर्वविघ्नविनाशनं॥१९॥ प्रकृतानिजपेल्लक्षंमाघमासेतुलक्षकं· स्रण
बालवधानांचपाश्यांदोषात्प्रमुच्यते·२०॥ त्रिकद्रुकेषुलक्षंतुजपेल्लक्षंशिवालये· कन्यामनुपनीतंवाहत्वायदि
विनश्यति२१॥ अग्निःसमिंजपेल्लक्षंदीक्षितानांवधोयदि· तस्याद्दोषात्वलिप्येतव्ययुतंविष्णुविमंदिरे·२२
स्रनस्येतिजपेल्लक्षंव्ययुतंविष्णुमंदिरे· अश्वत्थेमाघमासेतुमूत्ररोगोविनश्यति॥२३॥ वायोशुक्रोजपेल्ल

वि॰ सूक्तं मंत्रं वै अयुतं बुधः॥ विविधा वातरोगाश्च विनश्यंति न संशयः॥२४॥ वरुणं वो जपेत्सूक्तं मयुतं धात्रिमूलके प
पातादिव्याधिनाशस्तु सुखी पश्चात्स्थितो भुवि॥२५॥ वरुणं वो जपेत्सूक्तं शीतज्वरविनाशनं॥ लिंगं स्पृष्ट्वायुतं धी
ऋ मान्रोगी शीघ्रतस्तथा॥२६॥ इमा रुद्राय तवसे न पेत्सूक्तं शिवालये ज्वरविनाशाय चायुतं नात्र संशयः
२७ इमा रुद्राय सूक्तं तु जपेच्चैव शिवसंनिधौ॥ कायशूलादिरोगघ्नमयुतं नात्र संशयः॥२८॥ न तं विदाथ मंत्रेण
जले लक्षे जले लक्षं जपेद्यदि। कृष्णाजिनस्य दानस्य किल्बिषं नैव विंदति॥२९॥ अग्रेस क्षेप सूक्तं तु जलेल
लक्षं जपेद्यदि॥ बहुप्राणिवधं कुर्वन्नग्निदोषो विनश्यति॥३०॥ आ ते पितर्जपेत्सूक्तं लक्षमेकं शिवालये।
गरदोपि भवेत्पूतः सर्वपापैः प्रमुच्यते॥३१॥ न तं राजानो मंत्रं जपं धान्यो लक्षं करोति चेत्॥ प्रतिग्रहकृतं पुं
सो विल्वे वा नश्यति ध्रुवं॥३२॥ यस्ते मन्यो जपेत्सूक्तं आश्वयुज्यां च लक्षकं॥ महिषीदानदोषात्तु मुच्यते ना
त्र संशयः॥३३॥ एवा पित्रे जपेत्सूक्तं मार्गशीर्षे शिवालये। उभयतोमुखीदानदोषाल्लक्षात्प्रमुच्यते॥३४॥ ६
भूप ब्रह्मस्का उपेन्मंत्रं वैशाखे विष्णुमंदिरे। लक्षसंख्या जपेन्मंत्रं मुच्यते च अप्रतिग्रहात्॥३५॥ जगृभ्मा ते जपे

त्सूक्तं लक्षसंख्या तु फाल्गुने। कुंजरस्य तु दानस्य पापान्मुच्येत वै द्विजः॥३६॥ महिनो महतां शैवे श्रावयेत्तु विष्णु
ध्वति। लक्षमेकं जपेत्सूक्तं कालपौरुषसंग्रहात्॥३७॥ महे नो अद्य सूक्तं तु माघे लक्षं जले जपेत्। उद्धृताद्वप
दानस्य मुच्यते भूस्करोत्तमः॥३८॥ आ गावो पि जपेत्सूक्तं ज्येष्ठे वैश्यायुतं जले। गोदानस्य च यत्पापं प्रणश्य
ति न संशयः॥३९॥ महि वो महतां सूक्तं मयुतं वैष्णवे जपेत्। वेश्यासंपर्कदोषात्तु कार्तिक्यां तु प्रणश्यति॥४०
प्रति प्रियतमं सूक्तं बदर्यामयुतं जपेत्। वृषलीसंगदोषस्तु श्रावणे तु विनश्यतु॥४१॥ यद्द्य वं जपेत्सूक्तं
लक्षधात्र्यां तु फाल्गुने। विधवासंगदोषस्तु प्रणश्यति न संशयः॥४२॥ चंद्रमा अप्स्व सूक्तं वैरण्यचराणां
वधे जपेत्। अयुतं बिल्वमूले तु चैत्रदोषात्प्रमुच्यते॥४३॥ इंद्र मित्रं जपेत्सूक्तं योगिनां चैव घो यदि॥ लक्षं
माघे नदीसंगे तदा पापात्प्रमुच्यते॥४४॥ जपेत्सूक्तं यतीनां वै वधे सप्रमत्तथेति च॥ लक्षं धात्र्यां ज्येष्ठ
मासे ततो मुच्येत किल्बिषात्॥४५॥ प्र ब्रह्मैतिज्जपेन्मंत्रं अष्टोत्तरशतं यदि। सहस्रमंत्र सदृशं किमलश्च
जगत्त्रये॥४६॥ वातस्य तु जपेत्सूक्तं नवश्राद्धे जले शतं। दोषात्प्रमुच्यते सत्यं स्वीकरोति यदा तदा॥ ४७॥

·पि. कुर्य्याद्दमंत्रसूक्तं वेसहस्रंतु जले जपेत् · एकाहिकं तु यो भुंक्ते तदा पापात्प्रमुच्यते · ५०॥ अपेदिमनसः सूक्तं श्रा
द्धे भुंक्ते तु षोडशे तदा मुच्येत नरकात्त्रिंशद्वारं जपेद्यदि · ५१॥ मयोभूरथ जपेत्सूक्तं ह्येपोत्सर्गे तु रोदके · भुक्त्वाय
७ दि विनश्येत त्रिंशद्वारं जले यदा ५२॥ विभ्राड्बृहज्जपेत्सूक्तं सापिंड्ये भोजने जले · प्रेतस्य च त्रयोविंशद
न्नेन विनकिल्बिषं · ५३॥ त्वमग्ने इति सूक्तं चेन्न्यूने भुंक्ते जले यदि · पंचत्रिंशद्विमुच्येत नरकात्सर्वथा नरः॥५४
आयाहि प्रजपेत्सूक्तं मनसस्कर्हिः करोति यत् · दिने दिने पंचवारं जले वा विष्णुमंदिरे · ५५ सहस्रसूक्तसदृशं
जातवेदस मंत्रकं · बिल्वेमा यैलक्षसंख्याम निर्माणदीश्च विंदति ५६ जातवेदसमाहात्म्यमृषिभिः प्रोच्यते
बुधैः ध्रुवा सु वा जपेन्मंत्रं त्र्ययुतं शंखलादिना॥५७॥ बंधनान्मुच्यते सत्यं नारी वा पुरुषोपि वा · अहंभुवं
जपेत्सूक्तं ब्रह्मविद्यां च विंदति · ५८॥ दिने दिने पंचवारं मूलाविद्या वितश्यति · रोहित्वा वा जपेद्दुर्गमेक
वारं दिने दिने · ५७॥ बिल्वालये च गोष्ठे वा गोप्रदानफलं लभेत् · अमंसोध्या पंत्रयो दृश्यां मनीषी प्रजपे ७
द्यदि · ५८॥ मनस्पाः स्यमहद्धूदो विष्णुलोकं स गच्छति · स यो वृ जपेत्सूक्तं वंध्यात्वं शिवालये · ५९॥

आयुष्मंतं सुपुत्रं सा भाग्यवंतं प्रसूयते · अपवस्त जपेत्सूक्तं मस्य श्यस्पर्शनं यदा ६१ विमुच्येत तदा वा ध्यात्वं
च वारं शुचिर्भवेत् · वेश्वानरस्य सूक्तस्य जपस्य च फलं लभेत् ६२॥ गुरुवाक्ये च विश्वासं पंचवारं दिने दि
ने · विद्युत्स्वं तु जपेत्सूक्तमेकवारं दिने दिने॥ ६३॥ नवरकप्रं श्रीकरं च देवपेहं च विंदति · यस्तो देवानां
जपेत्सूक्तं त्र्ययुतं विष्णुमंदिरे॥ ६४॥ मृतपुत्रा नपुत्रा वा सत्पुत्रं सर्वथा लभेत् · आयनीपा जपेत्सूक्तं च
कन्यालभेद्यदि · ६५ नत्पुत्रं लभते पश्चा दयुतं विष्णुमंदिरे · अभीवर्त्तेन त्र्ययुतं च जपेद्यदि शिवा
लये ॥६६॥ चैत्रमासे बदर्याये क्षुद्रदोषो विनश्यति · त्रवोयावा जपेत्सूक्तं त्र्ययुतं बिल्वमूलके ६७
न्येषि भूततज पांतस्य किंचि दोषो न विंदति · प्रसूनवो जपेत्सूक्तं त्र्ययुतं तु शिवालये · ६८॥ मत्तबुद्धिः स
दा स्त्रीषु मान्यबुद्धिः प्रवर्तते · यदादी ध्ये जपेन्मंत्रं दशवारं दिने दिने · ६९॥ अकाले निति कर्माणि काले
काले कृतानि रे॥ रात्री सूक्तं जपेद्रात्रौ त्रिवारं तु दिने दिने ॥६९॥ पथि तपेत विनाश व्याघ्रादीनां
च नाशनं · सभामेति जपेन्मंत्रं त्रिंशद्वारं दिने दिने॥ ७०॥ केतरेनतु मत्पापं मुच्यते तच्छिवालये॥ ना

१. ति. नानंवैजपेद्रुद्रं मंनकालेप्रशस्तकं॥७१॥ दिनेदिनेचैकवारं सर्वपापैः प्रमुच्यते· त्रिपंचाशोजपेन्मंत्रं
८ त्रिंशद्वारं दिनेदिने· ७२ राज्ञाप्रीतिलभेद्वीरजासुप्रीतिवर्द्धनं॥ भक्षरासेजपेन्मंत्रं शतवारंदिनादि
ने॥७३॥ दिव्यवस्त्रं दिव्यभोगं बहुद्रव्यंचविंदति· अबुध्रमुत्येरुद्रंतु माघेलक्षेजपेद्धिया॥७४॥ सर्व
पापविनिर्मुक्तो देवेंद्रत्वंचगच्छति॥ द्विशिष्यश्चजपेन्मंत्रं मार्गशीर्षेतुलक्षकं॥७५॥ स्नुषासंगमदो
षेणमुच्यतेविष्णुमंदिरे· अन्यैर्जायांजपेन्मंत्रं लक्षसंख्याशिवालये॥७६॥ परस्त्रीसंगदोषेणमा
घमासेविमुच्यते॥ रुद्रंद्वादशलक्षंचइंद्रसोमपिमंजपेत्॥७७॥ अनामिकांसंगदोषश्चचैत्रा
दौफाल्गुनावधि। कन्यावज्जपेद्रुद्रं वर्द्धयेत्पंचलक्षकं॥७८॥ कारुस्त्रीसंगदोषेणमुच्यतेनात्र
संशयः॥ अमायांश्राद्धभोक्ताचेत्तंनःपश्चाज्जपेद्वचं॥७९॥ प्रतिपर्वाखिलैःपापैर्मुच्यतेनात्रसंश
यः॥ प्रोअस्मादुपरुद्रंतु जपेल्लक्षंशिवालये॥८०॥ दिवाकीर्तिस्त्रियंगत्वासंगदोषात्प्रमुच्यते॥ ८
रुद्रंद्वादशलक्षंचइंद्रसोमानिमंजपेत्॥८१॥ अनामिकांसंगदोषश्चचैत्रादौफाल्गुनावधिप्रभं

गाश्चरोजपेन्मंत्रं लक्षसंख्याशिवालये॥८२॥ रजस्वलासंगदोषः प्रणश्यतिनसंशयः॥ चौरपासंगदोष
स्तुप्रणश्यतिनसंशयः॥८३॥ अस्तम्नाद्योजपेद्रुद्रं त्र्ययुतंविष्णुमंदिरे॥ रजकीनांचनारीणांसंगश्चेत्कित्तु
विषंनहि॥८४॥ इमेविप्रस्यरुद्रंतु जपेत्कोटिर्जलेयदि· बहुस्त्रीरजातिसंपर्कदोषोनश्यत्यसंशयं ८५॥ द्रु
रादिदेवरुद्रंतु दशलक्षंशिवालये ॥ सर्वपातकनिर्मुक्तोभूतिमुक्तिंचविंदति ८७॥ अग्निर्नेंद्रेणरुद्र
केनत्र्ययुतेनजपेनच॥ क्षत्रियाणांचनारीणांसंगदोषोनेविंश्यति॥८८॥ मार्गशीर्षेजपेल्लक्षंयोजागादे
निमंत्रकं। वैश्यस्त्रीसंगदोषस्तुधाव्यांनश्यत्यसंशयं॥ अग्निर्जागारमंत्रंतुजपेल्लक्षंशिवालये॥ स्त्रीमा
त्रसंगदोषस्तुनश्येतब्रह्मचारिणं॥८७॥ सदाशृणोजपेन्मंत्रं लक्षसंख्यातुफाल्गुने। ब्रह्मचारीतुतांबू
लेनश्रीबाघदिनश्यति॥८८॥ रुद्रंतंभरोजपेन्मंत्रं साधुस्त्रीणांविसर्जनं। चैत्रेलक्षंवर्द्धयेत्तस्माद्दो
पात्प्रमुच्यते॥८९॥ श्येनआउसांजपेन्मंत्रं आश्वयुज्यांतुलक्षकं॥ विंदर्निदाहतंपापंप्रणश्यतिनसं
शयः॥९०॥ याद्रुगेवजपेन्मंत्रं वर्द्धयेत्तुलक्षकं· राजन्याहंसानरकंप्रणश्यतिनसंशयः॥९१॥ वे

द॰ वि॰ वैशाखे धर्षयेज्जपेन्मंत्रं लक्षं चैव हि विष्णुमंदिरे॥ राजासेवाकृतं पापं ज्येष्ठमासे विनश्यति॥ ९२॥ ज्यायांसस्य मंत्रं
८ तु धात्र्यां लक्षं जपेद्यदि॥ राजस्त्रीसंगनरकं मार्गशीर्षे विनश्यति ९३ समुद्रमासां मंत्रं च वदर्यां येसुतं ज
पेत्॰ विनश्यति तदा नित्यं वैश्यस्त्रीसंगकिल्बिषं॥ ९४॥ सहिक्षत्रस्य मंत्रं च जपेदश्वत्थमूलके॥ अ
युतं माघमासे तु शूद्रसेवाहसः क्षयं॥ ९५॥ अभिमुखे जपेन्मंत्रं योमेराज्ञं जपेद्यदि॥ अहो नारं तु साहस्रं
जले वा विष्णुमंदिरे॥ ९७॥ मंत्रं जपेद्धि श्रद्धितेलक्षं चैत्रे शिवालये॰ क्षेत्रापहारनरकः प्रणश्यति न संशयः॰ ९८
सत्रासाहोजपेन्मंत्रं लक्षं चैत्फाल्गुने जले॰ रत्नापहारनरकान्मुच्यते नात्र संशयः॥ ९९॥ अनातुदो जपे
न्मंत्रं लक्षं चैव हि विष्णुमंदिरे॥ धनवस्त्रं च कार्तिक्यां धनं धान्यं च विंदति॥ ९९॥ यज्ञेन गातुं मंत्रेण दशवारं
दिने दिने॥ जपेज्जले बिल्वे वा बहुद्रव्यं च विंदति॥ १००॥ इंद्रश्रेष्ठाति मंत्रं च अल्पलक्षं चिर्जपेद् दृश्यं॥ त्रिव
र्षानं ब्रतं सत्यं सहस्रं विंदते वसु॥ १॥ स्वाहुष्किला जपेन्मंत्रं शतवारं दिने दिने॥ वज्रिणा ग्रहवक्का च ८
मेदिन्यां कीर्तिमान् भवेत्॥ अयंस्वाद्वुर्जपेन्मंत्रं शतवारं दिने दिने॥ २॥ राक्षसैः [redacted] सह वक्ता

चतेभ्योप्यमिंप्रयाति सः॥ अयं मेयीति मंत्रस्य शं जपं कुर्यात्छतं जले॥ ३॥ दिने दिने प्रवक्ता च पक्षैः सहसहामुदि॰
अयंसयोन्जपेन्मंत्रं शतवारं दिने दिने ४ गंधर्वैः सह वक्ता च सौभाग्यं विंदते मुदि॰ अयं विश्वैर्जपेन्मंत्रं श
तवारं दिने दिने॥ ५॥ किंनरैः सह वक्ता च सौंदर्यं भुवि चेति सः॥ वृषलिपिबजपेन्मंत्रं शतवारं दिने दिने ६
ब्रह्मणा सह वक्ता च ब्रह्मलोके महीयते॥ इंद्रप्रणो जपेन्मंत्रं शतवारं दिने दिने॥ ७॥ विष्णुना सह वक्ता
चाविष्णुलोके महीयते॥ उरुंनोलोकं जपेन्मंत्रं शतवारं॥ ८॥ शिवेन सह वक्ता च शिवलोके महीयते॥ व
रिष्ठेन जपेन्मंत्रं शतवारं दिने दिने॥ ९॥ किंपुरुषैः सह वक्ता च सुपुत्रं लभते तिसः॥ इंद्रक्रतुं जपेत् मंत्रं
शतवारं दिने दिने॥ १०॥ विंदते वै धनं धान्यं वक्ता विद्याधरैः सह॥ मंद्रस्य कवेर्मंत्रं च दिनं प्रतिजपेच्छतं॥ ११॥
आश्रियायिस्यलोके पुत्रियास्तस्युर्न ना शुचिः॥ अयमु शानो मंत्रं च जपेत्प्रतिदिनं शतं॥ १२॥ मनः शुद्धिं च
काशुद्धिं कायशुद्धिं च विंदति॥ नूरणानो जपेन्मंत्रं शतवारं दि॰॥ १३॥ अणिमादिमहासिद्धिलब्ध्वा लोकेषु
पूज्यते॥ इंद्र पित्र जपेन्मंत्रं शत॰॥ १४॥ भ्रातुस्तेहो विवर्द्धेत निस्नेहो नास्ति सर्वथा॥ अस्यावित्तं जपेन्मंत्रं शं॰ १५

२॰ वि॰ पितृभक्तिस्तु पुत्रस्य मातृभक्तिर्विवर्द्धते ॥ दिने दिने प्रसादस्तं जपेन्मंत्रमयादितः ॥ १६ ॥ वत्सरांते भोग्यभोगाप
१० न्भूमिलमेकवं ॥ दूराश्चिदा जपेन्मंत्रं लक्षमाद्येजपेद्यदि ॥ १७ ॥ गृहस्थधर्मलोपस्य प्रायश्चित्तं तवेवदि ॥ तं वोधि
या जपेन्मंलक्ष चैवेशिवालये ॥ १८ ॥ ब्रह्मचारिणधर्मस्य शून्यं चेत्पूर्णमेवहि ॥ जपेन्मंत्रं चवर्द्धा वा कार्तिक्यां वि
ष्णुमंदिरे ॥ १९ ॥ वानप्रस्थाश्रमे धर्मः शून्यं संपूर्णतामियात् । एवाजहानं मंत्रं तु जपेल्लक्षं तु फाल्गुने ॥ २० ॥ न
ष्टस्त्रं नष्टध्वनं पुनरायाति सर्वथा ॥ समिद्धमग्निमंत्रं दिनं प्रतिजपेद्धतं ॥ २१ ॥ मानसीं देवतां पूजां लभते ना
त्र संशयः ॥ आयाद्दिव्यश्चन्मंत्रं दिनं प्रतिजपेद्धतं ॥ २२ ॥ कापिकीं देवतां पूजां लभते नात्र संशयः ॥ प्रोपसीतु
जपेत्स्कंस्के लक्षद्वादशकं जलेत् ॥ २३ ॥ गुप्तपापं विनश्येत चैत्रादौ फाल्गुनावधि ॥ अहेकमानो मंत्रं च दिन
प्रति जपेद्धतं ॥ २४ ॥ शास्त्रेषु संशयो नास्ति विश्वासः सर्वथा भवेत् । यातेकाकुं जपेन्मंत्रं शतवा० ॥ २५ ॥ भ्रां
तिबुद्धिर्न शास्त्रेषु यथा तथ्यं च दृश्यते ॥ स्कतः सोमो जपेन्मंत्रं शतवा० ॥ २६ ॥ अन्यथार्थं न शास्त्रेषु यथार्थं दृ
श्यते मतं ॥ ह्वयामसि जपेन्मंत्रं शतवा० ॥ २७ ॥ व्यासोक्ते तु पुराणार्थे यथार्थं दृश्यते सदा । प्रोत्वसैप्र जपेन्मंत्रं श० २९ १०

महद्वाक्येषु विश्वासमविश्वासं न सर्वथा ॥ एमेनं सृजपेन्मंत्रं शतवा० ॥ २८ ॥ स्मृत्यर्थे नान्यथा बुद्धि यथार्थं पश्यते
द्विजः ॥ प्रपर्वतानां सूक्तं तु जपेल्लक्षं जपेद्यदि ॥ ३० ॥ विल्वे दापापनाशश्च ततो भूतिमवाप्नुयात् । यदीस्तेभि
मंत्रं वै विंशद्वारं जपेद्यदि ॥ ३१ ॥ अतुमासिके बुधो भुंक्ते पातकान्मुच्यते यदा ॥ अद्यं न हिं परिशयानं पंचविंशं जपे
द्वचं ॥ ३२ ॥ पछेनुमासिके भुंक्ते तस्माद्दोषो न लिप्यते । यद्वो हितेर्जपेन्मंत्रं विंशद्वारं दिने दिने ॥ ३३ ॥ अन्हातुमा
सिके भुंक्ते तदापापात्प्रमुच्यते । तद्विप्रासो जपेन्मंत्रं दशवारं दिने दिने ॥ ३४ ॥ अंतकाले महाविष्णुं स्मरेन्नान्यन
सर्वथा ॥ अतो देवेतिमंत्रं दिनं प्रति जपेद्धतं ॥ ३५ ॥ विष्णुलोके स्थितः पश्चाद्देवैरिंद्रादिभिः सह ॥ इदं विष्णुर्जपेन्मं
त्रं शतवा० ॥ ३६ ॥ जपादीनां तु संयुक्तास्ततः सारूप्यमर्हति । त्रीणि पदा जपेन्मंत्रं शतवा० ॥ ३७ ॥ सामीप्यमेति वि
ष्णोश्च वैनतेयादिभिः सह ॥ विष्णोः कर्माणि मंत्रं च दिनं प्रति जपेद्धतं ॥ ३८ ॥ सार्ष्टिमेति महाविष्णोर्विष्वक्से
नादिभिः सह ॥ धारावरा जपेन्मंत्रं शतवारं जलेयदा ॥ ३९ ॥ [illegible] इंद्रियं यदा यानि मुच्यते पातकात्सुधीः । धा
वानो स्त्वभिमंत्रं सदा धाम्यां जपेद्धतां । ४० रितः पततिमे दिन्यां तदा पापात्प्रमुच्यते । उक्षते प्र जपेन्मंत्रं श० ॥ ४१ ॥

शि· स्वस्त्रियाममतासंगात्तस्मात्पापात्प्रमुच्यते· एकेनतापजपेन्मंत्रंवदर्यावितदाशतं॥४२॥ दिवास्वस्त्रिषुसंगम्यत
तदानश्यतिकल्मषः॥ दंधच्चेभिर्जपेन्मंत्रंच्युतोकल्मषानदि॥४३॥ रजस्वलाभार्यायाः संगश्चेत्रात्रसंशयः॥अ
११ तोऽष्टाणिमंत्रेणशतंदोषोजपन्तहि॥४४॥ स्वभार्यासंगकाले तुपरस्त्रीस्मरणंयथा· तंनोदातुज
पेन्मंत्रंलक्षंपापंनसर्वथा·॥४५॥ प्रजावत्याःसंगमश्चज्ञाननोज्ञाननतोयदि पथ्यपुंजतेजपेन्मंत्रंधात्र्यां पं
चशतंयदि·॥४६॥ कनिष्ठभ्रातृभार्यायां संगमात्किल्बिषंनतु· योनीमनुतोमंत्रंचवदर्यालक्षकंजपेत्·॥४७॥
दोषात्प्रमुच्यतेजंतुशत्रूणांसंगमोयदि· चित्रंतद्दोजपेन्मंत्रंमश्वत्थेलक्षेलक्षेउक्षिवृक्षः॥४८॥ मातृच
सुः संगदोषःप्रणश्यतिनसंशयः॥ तान्वोमहीजपेन्मंत्रंशतवारंदिनेदिने॥४९॥ विंदतेचधनंधान्यंश्रीकी
र्तिर्ब्रह्मवर्चसं· तेदशवाजपेन्मंत्रंशतवा०॥५०॥ अंतकालेविष्णुतेजोलभकेतेनात्रसंशयः॥ तेक्षोणभि
जपेन्मंत्रंमयुतंविष्णुमंदिरे·॥५१॥ शतमानस्यदानस्यचैवेदोषेनविद्यते· तांश्यानोजपेन्मंत्रंजलेयादिसह ११
स्रकं·॥५२॥ क्रांतेयस्यदानस्यकिल्बिषेनात्रसंशयः॥ ययारथंजपेन्मंत्रंसहस्रंचशिवालये॥५३॥ गोदा

नस्यविमुच्येतवैतरण्याश्चकिल्बिषात्· संचत्वेप्रजपेन्मंत्रंलक्षकंवदर्यांकिल्बिषंनतु॥५४॥ प्रायश्चित्तंमा
घमासेप्रशस्तेन्युयुतंस्वीकरोजपेत्· सहस्रशुनोजपेन्मंत्रंलक्षकंअस्मिनरकंनतु·॥५५॥ ब्रह्मदंडंबग्रह्मजाति
मार्गशीर्षेसहस्रकं· स्नायाद्यायप्रयतोऽज्ञवाइमंमेगंगदुग्धपि॥५६॥ वापीकूपतडागादिनदीपुष्पार्थंतंलि
दंरअग्निः शुचिर्जपेन्मंत्रंशतवारंदिने॥५७॥ पिशाचोदिश्यस्थानानिभुंजतेभूरस्तथा· अघूर्ण्याप्रजपे
ल्लक्षकंमेकवारंदिनेदिने॥५८॥ विष्णुलयेजलेवापिकत्तूनांलभतेफलं· संम्राक्षीतिजपेन्मंत्रंशतवा०॥५९॥
पतिव्रतास्वभार्यायासाद्दष्टद्दयवर्द्धनी॥ सुकिंशुकंजपेन्मंत्रंशतवा०॥६०॥ ननेमरणंनास्तितस्यःसा
पुत्रेतिसः॥ इमंत्वमिंद्रमंत्रंचशतवा०॥६१॥ पुत्रवान्भाग्यविदुषोजीवनऽशरधांशतं· समंत्रंतुजपेन्मं
त्रंशतवारं०॥६२॥ दंपत्योःप्रेममेश्रीचपापिनीननिवर्तयेत्· प्रदेवमच्छासूक्तंजपेद्दशादिनेदिने॥६३॥ तस्य
देभक्ष्यभोज्यंचधनंधान्यंविवर्द्धते· दक्षिणावर्तांमंत्रंचदिनंप्रतिशतंजपेत्॥६४॥ भूमंस्थित्वासुखंभुं
क्त्वापरोक्षेमोक्षमाप्नुयात्· अहंभुवेजपेत्सूक्तंमेकवारंवारंदिनेदिने॥६५॥ जपंतिचेदत्यर्थंतुपापान्मुच्य

वि. वसस्यतः॥शुचीचोद्यधाजपेन्मंत्रं शतवा॥६८॥स्पृष्टास्पृष्टेतेदोषोस्तिशुचिर्भवतितत्क्षणात्‌· अग्निरस्मि
१२ जपेन्मंत्रं शतवा॥६९॥नाभिस्पृष्टाभोजनांतेदोषनंपाचनंभवेत्‌·उषसःपूर्वाःसूक्तंतुजपेत्सुप्तंशिवालये६
दतमूर्ध्नप्रहारस्यनदोषश्चैवफाल्गुने· अधागावजपेन्मंत्रंलक्षंबिल्वेशिवालये६९॥क्षेत्रापहारनकंप्रणश्य
तिनसंशयः॥अधत्वमिंद्रमंत्रंचशजपेल्लक्षंकसुधीः॥७०॥सत्पात्रेदत्तदानेचपश्चाद्योनस्तदोषभाक्‌· अधप्रद्रा
जामंत्रंचमयुतंफाल्गुनेजपेत्‌॥७१॥यस्याउद्देशदानंचतत्तंतस्मैनाकिल्बिषं·अधनस्तजपेन्मंत्रंसहस्रंतुजलेपिवा॥७२
अजातिभोग्निदाताचलिप्यतेनैवकिल्बिषैः॥तमुष्टिहीयोजपेन्मंत्रमेकादशदिनेदिने॥७३॥श्रीरुद्रस्यपत्पुण्यंत
त्पुण्यंविंदतेजपात्‌·तदिदासजपेन्मंत्रंशतवारंदिनेदिने॥७४॥मंत्रराजसमंसत्यंभुक्तिमुक्तिफलप्रदं· तदिदासत्तपेत्सूक्तं
एकवारंदिनेदिने॥७५॥नवानिकोटिमंत्रेस्तयत्फलंलभतेतुनत्‌·इन्द्राहिमजपेत्सूक्तंमेकवारंदिनेदिने॥७६॥सु
रवेनमुक्तंस्वर्गदेवत्रपौत्रादिभिःसह॥सुगोदिवोजपेन्मंत्रंशतवा॥७७॥शत्रुभयश्चागतंदुःखंनस्पृशेत्सर्वथानरः॥वि १२
धेमतेजपेन्मंत्रंश०॥७८॥कुर्यादिवाविचारेणत्वग्निहूत्रांदिनेदिने· इमंस्तोममर्हतेसूक्तंजपेचेदयुतंहरे॥७९॥पित्रोर्दि

मानाब्रह्मचारीवक्रिदृश्चेत्रपातकं॥उपासानक्तसूक्तंतुजपेद्दशजलेपिवा॥८०॥प्रमादाद्यानभुंक्तेतुसूतका
नंनकिल्बिषं॥समानमुख्यंमंत्रंचसहस्रंचसदाजपेत्‌॥८१॥शूद्रान्नंज्ञानतोभुंक्तेप्रमादाद्यान्नकिल्बिषं·प्रातर्यु
जाजपेन्मंत्रंमयुतंचेत्रपातकं॥८२॥रजकान्नंतुयोभुंक्तेज्ञानहीनतोपिवा॥अध्वर्यवोजपेन्मंत्रंसहस्रं
विमलेजले॥८३॥गणिकान्नंतरोभुंक्तेमुच्यतेचोक्तकिल्बिषात्‌·अस्तेवसुजपेन्मंत्रंसहस्रंनैवकिल्बिषात्‌॥८४
प्रमादाज्ज्ञानतोभुंक्तेगणकान्नंवपातदा॥दोहेनगांजपेन्मंत्रंमयुतंचेत्रपातकं॥८५॥ज्ञानतोज्ञानतोभुं
क्तेपतितान्नयदातदा॥किमंगत्वाजपेन्मंत्रंअयुतंचजलेसुधीः॥८६॥ज्ञानतोपियदाभुंक्तेकु७ध्यान्नैवकि